सोमाहुतिर्भार्गवः । अग्निः। गायत्री

**इमां मे अग्ने समिधमिमामुपसदं वनेः। इमा उ षु श्रुधी गिरः॥ २.००६.०१**

अग्ने- पावक सर्वभूतहितक्रतो। मे- मम। इमाम्- एताम्। समिधम्। इमामुपसदम्- एतदुपसदनम्। वनेः- सम्भजेथाः। इमाः- एतान्। गिरः- मन्त्रान्। सु- सुष्ठु। श्रुधि- शृणु ॥१॥

**अया ते अग्ने विधेमोर्जो नपादश्वमिष्टे। एना सूक्तेन सुजात॥ २.००६.०२**

ऊर्जो नपात्- शाक्त। अश्वमिष्टे- उपासकप्राणकाम। सुजात- शोभनजन्मसम्पन्न। अग्ने- पावक सर्वभूतहितक्रतो। अया- अनया प्रज्ञया। ते- तव। विधेम- परिचर्यां कुर्मः। एना- अनेन। सूक्तेन- मन्त्रवर्गेण च सेवां कुर्मः ॥२॥

**तं त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः। सपर्येम सपर्यवः॥ २.००६.०३**

द्रविणोदः- वरद। गिर्वणसम्- मन्त्रसम्भक्तारम्। द्रविणस्युम्- हव्यकामम्। तम्- तादृशम्। त्वा- भवन्तम्। गीर्भिः- मन्त्रैः। सपर्यवः- सेवकाः सन्तः। सपर्येम- परिचरेम ॥३॥

**स बोधि सूरिर्मघवा वसुपते वसुदावन्। युयोध्य१स्मद्द्वेषांसि॥ २.००६.०४**

वसुदावन्- वरद। सः- तादृशः सन्। सूरिः- मेधावी सन्। मघवा- सम्पद्वान् सन्। वसुपते- गृहपते। वस निवासे। बोधि- जागृहि। अस्मद्द्वेषांसि- अस्माकं द्वेषभावनानि। युयोधि- पृथक् कुरु ॥४॥

**स नो वृष्टिं दिवस्परि स नो वाजमनर्वाणम्। स नः सहस्रिणीरिषः॥ २.००६.०५**

सः- तादृशस्त्वम्। नः- अस्मभ्यम्। दिवस्परि- नभसः। वृष्टिं कुरु। अनर्वाणम्- अविचाल्यम्। वाजम्- धान्यादिकं कुरु। सहस्रिणीः- प्रभूताः। इषः- सत्कामनाः कुरु ॥५॥

Dr. Ranganji

WEBOLIM

**ई॒ळा॒नाया॒व॒स्यवे॒ यवि॑ष्ठ दू॒त नो॒ गि॒रा। यजि॑ष्ठ होत॒रा ग॑हि॥ २.००६.०६**

दूत। यविष्ठ- तरुणतम। यजिष्ठ- पूज्यतम। होतः- देवाह्वातः। नः- अस्माकम्। गिरा- मन्त्रेण। अवस्यवे- रक्षाकामाय। ईळानाय- मन्त्रविदे। आ गहि- आगच्छ ॥६॥

**अ॒न्तर्ह्य॑ग्न॒ ईय॑से वि॒द्वाञ्जन्मो॒भया॑ कवे। दू॒तो जन्ये॑व॒ मित्र्यः॑॥ २.००६.०७**

कवे- क्रान्तदर्शिन्। अग्ने- सर्वभूतहितक्रतो। उभया जन्म- अभ्युदयनिःश्रेयसयोः। विद्वान्- ज्ञाता सन्। दूतः सन्। अन्तः- अन्तर्हृदये। ईयसे- अभिसरसि ॥७॥

**स वि॒द्वाँ आ च॑ पिप्रयो॒ यक्षि॑ चिकित्व आनु॒षक्।**
**आ चा॒स्मिन्स॑त्सि ब॒र्हिषि॑॥ २.००६.०८**

सः- असौ। विद्वान्- विद्यावान्। चिकित्वः- प्रज्ञावान्। च। आनुषक्- क्रमेण। पिप्रयः- पूरय। यक्षि- सङ्गमय। आ- आभिमुख्येन। बर्हिषि- दर्भासने चित्तासने वा। सत्सि- उपविश ॥८॥

Dr. Ranganji

WEBOLIM